National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 212-216
© 2025 NJHSR
www.sanskritarticle.com

एच वी अमरनाथ
शोध विद्यार्थी,वेदविभागः,
कर्नाटक संस्कृतविश्वविद्यालयः,
चामराजपेटे,बेंगळूरु-कर्नाटक

Correspondence:
एच वी अमरनाथ
शोध विद्यार्थी,वेदविभागः,
कर्नाटक संस्कृतविश्वविद्यालयः,
चामराजपेटे,बेंगळूरु-कर्नाटक

# काण्वशतपथब्राह्मणनिरूपिते इष्टिप्रकरणे हविर्द्रव्यसंस्कारस्य परिशीलनम्

**एच वी अमरनाथ**

**यज्ञशब्दार्थः-**

काण्वशतपथब्राह्मणे "**अथ यद्यज्ञो नाम घ्नन्त्यु वा एनमेतद्यदभिषुण्वन्ति तं वै तज्जनयति यदेनं तन्वते यं वै तज्जायते यत्तायमानस्तस्माद्यज्ञो नाम यज्ञो ह वै नामैतद्यद्यज्ञ इत्याहुः**[1]", इतीयं कण्डिका सोमस्याभिषवसम्भरणादिप्रसङ्गे उपदिष्टा ।
अत्र सायणास्तु- 'सः -सोमः, तायमानः सन् जायते, अतो यन् परम्परया आहुतिभावं गच्छन् जायते पुनः पुनः सम्भवति । अतो यन् जायत इति यज्ञः । अतो वस्तुतो यज्ञः इति तस्य नाम[2], तद्यज्ञ इति परोक्षेण व्यवहरति[3], एवमेव "**यज्ञो वा अध्वरः**[4]", इत्यादिबहुविधनिर्वचनानि लभन्ते ।

कात्यायनाचार्यैः श्रौतसूत्रे पोर्वोक्तलक्षणस्य सारभूतयज्ञशब्दार्थ एवं निरूपितो '**यज्ञं व्याख्यास्यामः**' '**द्रव्यं देवता त्याग**[5]' इति । अत्र कर्काचार्य- व्याख्यानमेवं भवति 'द्रव्यं'-दधि-सोम- व्रीहि, यवादिः। 'देवता'- अग्नीन्द्रादिः । त्यागः- तदुद्देशेन क्रियमाणः स्वत्वनिवृत्यनुकूलो व्यापारः। त्रयमिदं मिलित्वा यज्ञस्वरूपमिति गम्यते ।

**हविर्यज्ञसामान्यलक्षणम् –**

"**हविर्यज्ञविधो ह वा अन्यः पशुबन्धः सवविधोऽन्यः स हैष हविर्यज्ञविधो यस्मिन्व्रतमुपनयति यस्मिन्नपः प्रणयति यस्मिन्पूर्णपात्रं निनयति यस्मिन्विष्णुक्रमान् क्रमति**[6]" इति शतपथब्राह्मणे पशुबन्धद्वैविध्यप्रवचनावसरे हविर्यज्ञलक्षणमपि प्रतिपादितम्। यस्मिन् कर्मणि व्रतमुपनयनम्, अपः प्रणनयनम्, पूर्णपात्रनिनयनम्, विष्णुक्रमक्रमणं च भवन्ति तत्स्थानं हविर्यज्ञस्थानं भवतीति।

"एतं हविर्यज्ञं ददृशुर्दर्शपूर्णमासौ ताभ्यामीजिरे" इति अन्येष्वपि कर्मविशेषेषु हविर्यज्ञस्वरूपं ब्राह्मणे प्रतिपादितम्। चातुर्मास्यस्यापि ऐष्टिकं, पाशुकं, सौमिकमिति भेदत्रयं प्रतिपादितं कात्यायनश्रौतसूत्रे। एवं निरूपिते हविर्यज्ञविधाने सर्वत्र हविर्निर्माणप्रक्रियाया वैशिष्ट्यं अतीव वर्तते। यतो हि आहूतदेवतानां हविर्द्रव्यसमर्पणमेव परमोत्कृष्टकर्मत्वात्। तत्रापि हविर्निर्माणात् प्राक् तेषां द्रव्याणां संस्करणं मुख्यं कर्म भवति । तन्निरूपणं यथा-

**१.१. हविर्निर्माणार्थं पदार्थसंस्कारः - तत्र प्रथमं हविर्वापनम्-**

ऋत्विजः पात्रासादनानन्तरं हविर्निर्माणार्थमुपक्रमन्ते । तत्तु "**कर्मणे वां वेषाय वा**[7]" मिति मन्त्रमुच्चरन् शूर्पाग्निहोत्रहवण्योः आदानेन प्रारभते । तस्यार्थवाद एवं वर्तते- "**यज्ञो वै कर्म, यज्ञाय त्वेत्येवैतदाह, वेषाय वामिति वेवेष्टीव हि यज्ञम्**[8]" इति यज्ञ एव कर्म तस्मै यज्ञाय कर्मणे एवमेव वेषाय व्याप्तै वां युवयोः अग्निहोत्रशूर्पयोः आदत्ते। अत्र सायणा[9]स्तु- "**यज्ञाय हि तदादानम्। अतः कर्मशब्दः कर्ममात्रपरोऽपि तद्विशेषं यज्ञमेव ब्रूते।** इज्यतेऽनेनेति यज्ञः हविः। तदिह निर्वापकाले व्रीहिरूपम्। तदग्निहोत्रहवण्या शूर्पे निर्वपन् वेवेष्टीव परिवेषणं करोतीव, यथान्नं दर्व्या भोजनपात्रे। अतो वेषाय वामित्युक्तम्" इति।

**१.१.१. वाङ्नियमः-**

इतः प्रभृति वाङ्नियमो भवति। "**अथ वाचं यच्छति, वाग्वै यज्ञः, अविक्षुब्धो यज्ञं तनवा इति**[10]" इति ब्राह्मणे वाङ्नियमवैशिष्ट्यं प्रतिपादितम्। वाग्यज्ञस्वरूपा भवति। अत्र सायणा[11]स्तु- "**चित्तविक्षोभहेतोर्वाग्व्यवहारस्य अभावात् तदैकाग्र्ये सति अविकलो यज्ञो यतः सम्पद्यते**" इति तस्य नियमस्य प्रयोजनं ऊचुः ।

**१.१.२. प्रतपनम्-**

"**स प्रतपति**[12]" गार्हपत्ये दक्षिणाग्नौ वा "**प्रत्युष्टः रक्षः प्रयुष्टा अरातयः**" इति "**निष्टप्तः रक्षो निष्टप्ता अरातयः**" इति वा मन्त्रमुच्चरन् प्रतपति। इति ब्राह्मणे प्रतपनकर्म प्रतिपादितम्। शूर्पाग्निहोत्रहवण्योः प्रतपनेन तयोरन्तः स्थिता असुरा दग्धा भवन्तीति मन्त्रार्थः। ब्राह्मणे[13] अस्य कारणमेवं प्रस्तुतम्- देवा यज्ञं विस्तारयितुमिष्टाः। ते तु असुररक्षसेभ्यः संसर्गाद् बिभयाञ्चक्रुः। तदा ते देवा अस्माद्यज्ञमुखादेव यज्ञप्रारम्भादेव राक्षसानां विनाशं चक्रुरिति। अत एव प्रतपनं क्रियते ।

**१.१.३. शकटं प्रति गमनम्-**

"**उर्वन्तरिक्षमन्वेमीति प्रैति**[14]" इति ब्राह्मणे गमने वैशिष्ट्यं प्रतिपादितम्। "**उर्वन्तरिक्षमन्वेमि**[15]" इति मन्त्रमुच्चरन् गार्हपत्याद-परस्मिन्देशे स्थितं शकटं प्रति गच्छति। **उरु** विस्तीर्णं, **अन्तरिक्षं** अवकाशं, **अन्वेमि** अनुसृत्य गच्छामीत्यत्र मन्त्रार्थः। अत्रार्थवादस्तु- यथा वृक्षो मूलैः पृथिवीमनुप्रविष्टः सन् तिष्ठति, न तु गच्छति। एवमेव अभित्वा पाशाभ्यां बध्वा ध्रियमाणाः पशव अपि तत्रैव तिष्ठन्ति। पुरुषस्तु अमूलः, एवमेव केनापि पाशबन्धोऽपि न। अत एव स प्रतिबन्धरहितः अन्तरिक्षे सर्वत्र गन्तुं शक्नोति। एवमेव असुरा अपि, प्रतिबन्धरहिताः चरन्ति। एवं शकटं प्रति गच्छन्तं ऋत्विजं अनुसरन् असुरो यज्ञप्रतिबन्धको भवितुमर्हति। तन्निवारणार्थं अनेन मन्त्रेण हिंसाकररहितमभयं कुरुते" इति।

**१.१.४. अनस एव हविर्ग्रहणम्–**

हविर्निर्माणार्थं एकैकस्या अपि देवताया चतुर्मुष्टिपरिमितं धान्यग्रहणं अनस एव कर्तव्यमिति। तत्र कारणत्रयं प्रतिपादितं ब्राह्मणे।

तत्र **प्रथमं कारणं** तु- "**सोऽनसो गृह्णाति**[16]" इति अनस एव हविर्ग्रहणे वैशिष्ट्यं प्रतिपादितं ब्राह्मणे। "अन एव हि प्रथमं धान्यस्याधिकरणम्। अनसः सकाशात् नीयमानं धान्यं पश्चादेव शालागतं भवति। एवमेव अग्रे गृहप्रवेशात् प्रागपि अनस्येव स्थितम्। अत एव अनस एव गृह्णीयादिति । अत्र सायणै[17]स्तु- "**अत एव गृहिणामाशयानुपहतं तदेव यज्ञसाधनं करवाणीति योग्यत्वे हेतु**" रिति विस्तृतम् ।

**द्वितीयकारणम् – "अथ यद्वेवाससो गृह्णाति भूमा वा अनः**[18]" इति। भूमानाम बहुतरमित्यर्थः। यदा धान्यं बहु भवति तदा "अथाऽनो वाह्यमित्याहुः" । तेनैव यज्ञसाधनेन शकटेन अनेतुं योग्यमिति ब्रुवन्ति लोके। बहुधान्यानयने साधनभूतत्वादनस एव गृह्णीयादिति द्वितीयं कारणम्।

**तृतीयं कारणम्** - "**यज्ञो वा अनः**[19]" अनो भवति यज्ञस्वरूपम् । अत एव अनस अवयवानां स्पर्शने यजुषां विनियोगो दृश्यते । एवं यदि कौष्ठस्य, कुम्भ्याः, भस्त्राया धान्यग्रहणे एतानि यजूंषि न उच्चार्यन्ते । अतः यज्ञस्वरूपादनस एव धान्यं गृह्णीयादिति ।

**१.१.४. पात्र्या धान्यग्रहणे धर्मविशेषः-**

"**उतो पात्र्या गृह्णन्ति, अन्तरायमु तर्हि यजूःषि जपेत्। तत्स्फ्यमुपोहन्ति यतो युनजाम तद्विमुञ्चाम**[20]" इत्युक्त्या अनो नास्ति चेत् पात्र्या धान्यग्रहणं कार्यम्। तया धान्यग्रहणे "**धूरसि**[21]" "**देवानामसि**[22]" इत्यादीनां यजुषां जपः कर्तव्यः इति विशेषः । पात्र्याः अधस्तात् स्फ्यमुपनिधाय गृह्णीयात् । अत्र कात्यायनोऽपि "**पात्र्यां वा स्फ्योपहितायां, धूरीषारोहणानि पात्रीबिले जपति**[23]" इति ।

अत्र सायणा[24]स्तु- "अनसो ग्रहणे स्फ्योपहितपात्रीतो ग्रहणेऽतिशयितं प्रयोजनमाह "यतो युनजाम ततो विमुञ्चामे"ति । योऽयं स्फ्यमाश्रित्य युनजाम यज्ञेन योगं प्राप्नुवाम, ततस्तस्मिन्नेव स्फ्ये 'विमुञ्चाम' इति वियोगमपि करवाम। इति योगवियोगसामानाधिरण्यसिद्धिः। स्फ्योपहितपात्रीतो ग्रहणपक्षे अनः पक्षादतिशय इत्यर्थः। अयमत्राभिप्रायः- अनसो निर्वापपक्षे हि जुहूपभृतौ शकटस्य धुरोर्निदध्यात् । पात्रीतः पुनर्निर्वापे तदाधारभूते स्फ्ये तयोर्निधानं विमोकः। तदुक्तं कात्यायनेन "**घृताची इति धुरि निदधात्यनसि चेद्ग्रहणम्**" "**स्फ्ये पात्र्यां चेत्**[25]" इति । तथाऽपां प्रणयनं च स्फ्येन सहेत्युक्तमापस्तम्बेन-"**स्फ्येनोपसंगृह्याविषिञ्चन् हरति**[26]" इति। एवं च स्फ्येनैव योगः, स्फ्य एव वियोगात्मको विमोकोऽपीति पात्रीतो ग्रहणे योगवियोगयोः सामानाधिकरण्यलाभोऽतिशय इति। अथ तयोर्वैयधिकरण्यात् सामानाधिकरण्योक्तोऽतिशय इत्याशङ्क्य लोकप्रसिद्ध्यनुसरणमतिशय इत्याह "यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति" इति । यत्रैव योगः, तत्रैव वियोगो न्याय्यः; न हि कर्णे युक्तः कट्या विमुच्यत इत्यर्थः" इति ।

**१.१.५. धुरः अग्निस्वरूपप्रतिपादनम्-**

"**तस्यानसोऽग्निरेव धूः**[27]" इति धुरो अग्निस्वरूपं प्रतिपादितं ब्राह्मणे । अत्र धूर्नाम "**शकटे आनडुत्स्कन्धस्योपरि यौ निधीयते तौ युगस्य प्रान्तौ युगशम्यान्तरालौ धूःशब्धेनोच्यते**" इति सायणभाष्ये[28] । एवं अनसो योगे खलु बलीवर्दा वहन्ति, एषां वहनसाधनं कन्धरूपमग्निदग्धमिव कृष्णवर्णं दृश्यते । अत एवाग्निस्वरूपो भवति धूः ।

एवमेव शकटस्याधःपतनं वारयितुमीषादण्डप्रोत्तम्भनार्था मेथी 'कस्तम्भी'। ईषाद्वयं यत्र संसृतं ततः प्रत्यग्भागः, तयोरीषयोः मध्यदेशः 'प्रउगम्'। तच्च पश्चाद्विस्तृतम्, पुरस्ताद्ध्रसीयः। वेदिरपि तथाविधैव भवति। धान्यनिधानाय परिश्रितप्रदेशो नीळः। हविर्धानमपि परिश्रितम् । परिश्रयणसाम्यत्वात् नीळस्य हविर्धानत्वम् । अत एव "स यदनसो गृह्णाति यज्ञाद्यज्ञं निर्मिमा इति" प्रतिपादितं तस्यामेव कण्डिकायाम् ।

**१.१.६. धूरसीति मन्त्रोच्चारणे विशेषः-** "**धूरसि धूर्वधूर्वन्तन्धूर्व तय्यौँऽस्मान् धूर्वति। धूर्व तय्यँव्वँयन्धूर्वामः**[29]"इति मन्त्रेण दक्षिणामुत्तरां वा एकां धुरमभिमर्शनं कार्यम् । अध्वर्युः हविर्ग्रहणाय शकटस्य पश्चाद्भागं गच्छति। तदा स धुर्यं पौरस्त्यमग्निं अतिक्रम्य गच्छति। तदतिक्रमे अग्निः क्रुध्येत्। तस्य प्रसादनायैव अयं मन्त्र उच्यते। अनेन मन्त्रोच्चारणेन तस्मै अग्नये निह्नुते- अतिक्रमजनितं स्वापराधं प्रशमय्य प्रसादयति ।

अत्र सायणा[30]स्तु- "यश्चास्माकं हिंसिता, योऽप्यस्माभिर्हिंस्यः, तं द्विविधं शत्रुमेव धूर्व हिंस्याः, योऽस्मानिति हि मन्त्रार्थः । तथा सति एवं प्रार्थितोऽग्निरतिक्रामन्तमपि अध्वर्युं न बाधत इत्यर्थः"इति ।

**१.१.७. ईषाभिमर्शने विशेषः-**

"**अथेषामभिमृशति[31]**" इतीषाभिमर्शनविधानं प्रतिपादितं ब्राह्मणे। ईषा नाम "शकटे प्रागपरायतो दीर्घः काष्ठविशेषः"। ईषामभिमृश्य "**देवानामसि सस्नितमव्वँह्नितमं पप्रितमञ्जुष्टतमन्देवहूतमम्। अह्रुतमसि हविर्धानन्दृःहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत्[32]**" इति मन्त्रजपः क्रियते। यद्यप्ययं मन्त्रः ईषामभिमृश्य जपति तथापि तदाधारीभूतस्य अनस एवात्र उपस्तवनमित्यवगम्यते। अस्याभिप्रा-यमेवं वर्तते यत् यजमानेन हविर्ग्रहणसमये देवानां तृप्तिजनने पर्याप्तं धान्यं स्वीकुर्यात् । तत्र "यज्ञपतिर्मा ह्वार्षीत्" यजमानो कुटिलगतिर्मा भवत्विति मन्त्रार्थः, अपर्याप्तधान्यस्वीकरणं मा करोत्विति ।

**१.१.८. अनस अधिरोहणे धान्यप्रेक्षणे च विशेषः-**

"**अथाधिरोहति विष्णुस्त्वा क्रमतामिति[33]**"इति शकटारोहणं प्रोक्तं ब्राह्मणे। "**विष्णुस्त्वा क्रमता**" मिति मन्त्रः । शकटं विष्णुस्त्वा नयत्विति अधिरोहति, नाहमिति मन्त्रार्थः। विष्णुः यज्ञात्मको भवति। स यज्ञात्मको विष्णुः देवेभ्यो विक्रान्तिं विचक्रमे । स प्रथमेन पादेन इमां पृथिवीं पस्पार पालयामास, द्वितीयेन पादेन अन्तरिक्षं, एवं तृतीयेन पादेन दिवं च पस्पार। स विष्णुः एतस्मै यजमानाय विक्रान्तिं विक्रमते इति ।

शकटस्थं धान्यं "**उरु वाताये**"ति मन्त्रेण प्रेक्षते। "**उरु वातायेत्यनः प्रेक्षते, प्राणो वै वातः**" इति ब्राह्मणे वातस्य प्राणस्वरूपं प्रतिपादितम्। "**वायुः प्राणो भूत्वा नासिके प्राविशत्[34]**" इति श्रुतेः वातप्राणयोरेकत्वम्। अनेन मन्त्रेण प्राणात्मकाय वाताय बहुकीर्तनं उरुगायं क्रियते इति विशेषः ।

**१.१.९. अपद्रव्यनिरसने विशेषः-**

"**अपहतः रक्ष इति तृणं वा किञ्चिद्वा निरस्यति**" इति धान्ये यदि तृणलोष्टादि अपद्रव्यं स्यात्तन्निरसनं कुर्यात् । यदि तु तत्र तृणादिकं न भवेत्, तदा पुरोळाशीयं व्रीहिसमूहमेवानेन मन्त्रेण अभिमृशेदिति विशेषः ।

**१.१.१०. धान्याभिनिधाने विशेषः –**

"**यच्छन्तां पञ्चेत्यभिनिदधाति[35]**" इति धान्यस्य समन्त्रकं अभिनिधानं स्पर्शनं विधत्तं ब्राह्मणे । अस्मिन् "**यच्छन्तां पञ्चे**"ति मन्त्रे पञ्चशब्दः "**पाङ्क्तो वै यज्ञः, पञ्चेमा अङ्गुलयः, यज्ञमेवैतदत्र दधाति**" इति विशेषेण व्याख्यातो ब्राह्मणे । अत्र सायणा[36]स्तु- "यज्ञोऽपि धानाकरम्भादिपञ्चहविष्क इति पञ्चसंख्यायोगात् पाङ्क्तः । तथा च तैत्तरीयकम्- "**धानाः करम्भः परिवापः पुरोळाशः पयस्या, तेन पङ्क्तिराप्यते; तद्यज्ञस्य पाङ्क्तत्वम्[37]**"। (अत्र सायणा[38]स्तु- भ्रष्टा धाना यवाः, आज्यसंयुक्ताः सक्तवः करम्भः, व्रीहिजन्या लाजाः परिवापाः, पिष्टविकारः पुरोळाशः, क्षीरविकारः पयस्या)। तथा सति एतेन पञ्चशब्दोपेतमन्त्रोच्चारणेन अस्मिन् शकटे यज्ञमेव धारयतीत्यर्थः" इति ।

**१.१.११. धान्यग्रहणे विशेषः-**

"**स गृह्णाति देवस्य त्वा[39]**" इति शकटात् धान्यग्रहणं निरूपितं ब्राह्मणे। अत्र मन्त्रव्याख्यानरूपं विशेषनिरूपणं दृश्यते । तत्र मन्त्रस्तु- "**देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। अग्नये जुष्टं गृह्णामि/अग्नीषोमाभ्यां जुष्टं गृह्णामि[40]**" इति मन्त्रेण तत्तदिष्टिगत-पुरोळाशसङ्ख्यानुगतं प्रतिपुरोळाशं चतुर्मुष्टिपरिमितं धान्यं शूर्पे गृह्णाति । मुष्टित्रयं समन्त्रं प्रक्षिप्य, चतुर्थं तूष्णीं प्रक्षिपति, एवं सर्वत्र । ब्राह्मणे तन्मन्त्रव्याख्यानं तु- "सविता वै देवानां प्रसविता तस्मादाह देवस्य त्वा, सवितुः प्रसव इत्यश्विनोर्बाहुभ्यामित्यशिना उ वै देवानामध्वर्यू तस्मादाहाश्विनोर्बाहुभ्यामिति पूष्णो हस्ताभ्यामिति पूषा वै देवानां भागदुघोऽशनं पाणिभ्यामुपनिधाता तस्मादाह पूष्णो हस्ताभ्यामिति" इति ।

अत्रेमं मन्त्रं भागत्रयं कृत्वावगन्तव्यो वर्तते । तत्र प्रथमभागे- "**देवस्य त्वा सवितुः प्रसवे**" इत्यस्य भागस्य "यः सवितृशब्दाभिधेयोऽस्ति सोऽयं देवानां मध्ये प्रसविता प्रेरको देवः। अथवा देवानामपि एष प्रेरकः" इति। द्वितीयभागे- "**अश्विनोर्बाहुभ्या**"मिति। पुरा देवकर्तृके यागे अश्विनौ अध्वर्यू अभूताम् । अतस्तयोरेव बाहुभ्यां हविर्गृह्णामीति अस्यार्थस्य प्रतिपादको मन्त्रभागो युक्त इत्यर्थः" इति । तृतीयभागे तु- "पूष्णो हस्ताभ्याम्" इति । पूषाख्यो देवः भागदुघः- भागं दोग्धीति, भागप्रद इत्यर्थः । तदृशः पूषा पाणितलाभ्यां सर्वस्य जनस्य अशनं भोज्यमन्नं उपस्थापनशक्तः। एवं पूषदेवताया हस्ताभ्यां हविर्ग्रहणं युक्तमिति भावः।

“**सत्यं देवा अनृतं मनुष्याः सत्येनैवैतद्गृह्णाती**[41]”ति। एवमेव पूर्वोक्तभागत्रये देवतास्मरणस्योपपादनं देवानां सत्यरूपत्वात् तदनुस्मरणेन हविर्ग्रहणरूपमनुष्ठानं फलपर्यवसायित्वात् सत्यं भवति। देवतास्मरणाभावे मनुष्याणामनृतरूपत्वात् तत्कर्तृकमनुष्ठानं फलशून्यत्वादनृतं भवतीत्यर्थः” इति सायणभाष्ये[42]।

**१.१.१२. हविषः देवतानां ऋणत्वरूपनिरूपणम्-**

“**यावतीभ्य उ वै देवताभ्यो हवींषि गृह्णन्नादिशत्यध्वर्युस्तास्तस्मा ऋणं मन्यन्ते यजमानाय यदस्मै तं काम समर्धयेयुर्यस्मै कामाय यजते तस्माद्देवताया आदिशति[43]**” इति। अध्वर्युः हविर्निर्मित्तं धान्यग्रहणसमये सर्वा अपि देवता वेद्यामेव भवन्ति, एवं “मम नामग्रहणं करिष्यति, मम नामग्रहणं करिष्यति” इति चिन्तयन्ति। तदा देवतापदग्रहणेन तासां परस्परकलहो न जायते इति वर्णितम्। एवमेव यद्देवतोद्देशेन यावत्परिमाणं धान्यग्रहणं कृतं, सा देवता तद्धविः ऋणमिति मन्यते । कथमिति चेत्- यत्काम्या हविर्गृह्णाति, तं काम्यमानं फलविशेषं यजमानाय येन प्रकारेण देवताः समर्धयेयुः। तेनैव कारणेन हविष ऋणरूपत्वं देवतानामिति अवगम्यते। “एवं तस्मात्कारणात् हविषि देवतानां ऋणत्वाभिमानात् फलप्रदानेन तत्प्रत्यर्पणार्थं तत्र देवतानामावश्यमादेष्टव्यमित्यर्थः” इति सायणाः[44]।

**१.१.१३. धान्यप्रत्यभिमर्शने विशेषः-**

“**स एतेन यजुषा यथापूर्वं गृहीत्वा प्रत्यभिमृशति भूताय त्वे**”ति “**यत एवेदं हविर्गृह्णाति तदेवैतेन पुनराप्यायति**[45]” इति स्पष्टीकृतं ब्राह्मणे। “**भूताय त्वा नारातये**” इति मन्त्रः । शकटे यस्मात्स्थानात् धान्यग्रहणं कृतं, तत्स्थानं समन्त्रकं प्रत्यभिमर्शति वर्धयतीति निरूपितम्। “भूताय- प्रभूताय समृद्ध्यर्थं, त्वामभिमृशामि, अरातये न - अदानायासमृद्धये नाभिमृशामि” इति।

**१.१.१४. प्रागवेक्षणे विशेषः-**

“**स्वरभिविख्येषमिति प्राङ्वीक्षते**” इति ब्राह्मणे प्रागवेक्षणे विशेषः प्रतिपादितः। “**स्वरभिविख्येषम्[46]**”इति मन्त्रः । तत्र अनः परिवृतं भवति। अनसि अवस्थितस्याध्वर्योः चक्षुः निरुद्धमिव भवति- काचकामलादिदोषदूषितमिव द्रष्टुं न समर्थं भवति । एवं सति कथं तत्र दर्शनोपायः इति चेत्- “**यज्ञ उ वै स्वरहर्देवाः सूर्योऽग्निस्तस्मादाह स्वरभिविख्येषमिति**” अत्र मन्त्रे स्वरित्येतत्पदं स्वर्गवाची, तेन तत्साधनभूतो यज्ञः, एवमेव अहः, सूर्यः, अग्निः इत्यादयो लक्षणया प्रतिपाद्यन्ते इत्यर्थः । अत्र सायणा[47]स्तु “तथा सति समन्त्रकप्रेक्षणेन स्वर्शब्द-प्रतिपादितं यज्ञादिचतुष्टयमर्थजातं प्राच्यां दिशि प्रथमत उपलभ्यमानम्। अतः अस्मात् शकटस्थानादवलोकयती”ति ।

**१.१.१५. शकटादवरोहणे विशेषः-**

“**अथावरोहति दृःहन्तां दुर्याः पृथिव्यामिति[48]**” ब्राह्मणे अवरोहणे विशेषो निरूपितः। अत्र मन्त्रार्थस्तु “पृथिव्यां वर्तमानाः- ये दुरो द्वाराणि- अर्हन्तीति दुर्याः गृहाः। ते दृःहन्तां दृढा भवन्तु” इति । अस्य यजमानस्य एषोऽध्वर्युः हविर्ग्रहणादिकं यज्ञसाधनं अनुतिष्ठति। तस्मिन्नवसरेऽत्र शकटस्थानादवरोहति । तमनुसृत्यैव यजमानस्य गृहा अपि अस्माद्भूलोकात् प्रच्युर्तिं प्राप्तुं, एवमेव यजमानकुलं विक्षोभयितुं च समर्था भवन्ति। अनेन मन्त्रेणावरोहन्नध्वर्युः तानेव यजमानस्य गृहान् अस्यां पृथिव्यां दृढीकरोतीति । एवमेव तेन कर्मणा यजमानस्य गृहा न विक्षोभन्ते” सुदृढा एव भवन्ति इति ब्राह्मणोक्तो विशेषः ।

**१.१.१६. प्रत्यागमने विशेषः-** “**उर्वन्तरिक्षमन्वेमीति प्रैति[49]**” इति ब्राह्मणे शकटस्थानात् प्रत्यागमने विशेषः प्रतिपादितः। पूर्वमपि शकटं प्रतिगमनसमयेऽयं मन्त्रविषयः प्रतिपादितः। तत्राप्ययमेव मन्त्र उच्यते। प्रत्यागन्तारमध्वर्युं यज्ञविघ्नकारको रक्ष अनुचरति। तन्निवारणायायं मन्त्र उच्यते। तेन विघ्ननिवारणो भवतीति ज्ञायते ।

**१.१.१७. हविर्द्रव्यासादने विशेषः-**

“**स यद्याहवनीये वा हवीःषि श्रपयन्ति गार्हपत्ये वा तत्सादयति[50]**” इति आहवनीयसमीपे गार्हपत्यसमीपे बा हविर्द्रव्यासादनं प्रतिपादितम्। तत्र मन्त्रस्तु -”**पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे। अग्ने हव्यः रक्षस्व[51]**” इति । अस्मिन् मन्त्रे नाभिशब्दस्यार्थः ब्राह्मणे एवं प्रतिपादितः- “**पृथिव्यास्त्वा नाभौ सादयामीति मध्यं वा नाभिर्मध्यमभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामीति**” इति । मनुष्यशरीरेषु नाभेर्मध्यदेशे अवस्थानात् पृथिव्या नाभिरिति मध्यमेवोच्यते। तच्च मध्यं अभयं भयरहितम्; प्रान्तदेशे हि चौरव्याघ्रादिभयम् ।अतः पृथिव्याः संबन्धिनि राक्षसादिभयरहिते स्थाने त्वां सादयामि इति मन्त्रभागस्यार्थः ।

“**अदित्या उपस्थ इत्युपस्थ इवाभार्षीदिति वै तदाहुर्यत्सुगुप्तं भवति सुगुप्तमसदिति[52]**” मन्त्रस्य द्वितीयभागं विस्तृतं ब्राह्मणे । उपस्थशब्दस्य उदरमध्यं उत्सङ्गमित्याद्यर्था निरूपिताः । मातुरुपस्थे शिशुर्यथा सुष्ठु रक्षितं भवति । तथैव इदं हव्यं हे अग्ने रक्षस्व इति मन्त्रभागस्य विस्तृतार्थः । अनेन स्वीकृतस्य हविर्द्रव्यस्य संरक्षणं अवश्यं कर्तव्यमिति ज्ञायते ।

**पाद टिप्पणी:**

1 का.श.ब्रा. ४-९-४-१९

2 मा.श.ब्रा.भा ३-९-४-१३

3 निरु. ३।४।२

4 का.श.ब्रा. ४-५-३-१६

5 का.श्रौ.सू १-२-१,२

6 का.श.ब्रा. १३-७-१-१

7 का.सं. १-३-२

8 का.श.ब्रा. २-१-२-३

9 मा.श.ब्रा.भा १-१-२-१

10 का.श.ब्रा. २-१-२-३

[11] मा.श.ब्रा.भा १-१-२-२

[12] का.श.ब्रा. २-१-२-४

[13] का.श.ब्रा. २-१-२-५

[14] का.श.ब्रा. २-१-२-६

[15] का.सं. १-३-३

[16] का.श.ब्रा. २-१-२-७

[17] मा.श.ब्रा.भा १-१-२-५

[18] का.श.ब्रा. २-१-२-८

[19] का.श.ब्रा. २-१-२-८

[20] का.श.ब्रा. २-१-२-८,९

[21] का.सं. १-३-४

[22] का.सं. १-३-५

[23] का.श्रौ.सू. २-३-२८,२९

[24] मा.श.ब्रा.भा १-१-२-८

[25] का.श्रौ.सू. ३-६-१८,१९

[26] आप.श्रौ १-१६-८

[27] का.श.ब्रा. २-१-२-९

[28] मा.श.ब्रा.भा १-१-२-९

[29] का.सं. १-३-४

[30] मा.श.ब्रा.भा १-१-२-१०

[31] का.श.ब्रा. २-१-२-११

[32] का.सं. १-३-५

[33] का.श.ब्रा. २-१-२-१२

[34] ऐ.ब्रा. १-४-२-४

[35] का.श.ब्रा. २-१-२-१२

[36] मा.श.ब्रा.भा १-१-२-१६

[37] तै.सं. ६-५-११-८

[38] तै.सं. सा.भा १-४-२८

[39] का.श.ब्रा. २-१-२-१३

[40] का.सं. १-३-६

[41] का.श.ब्रा. २-१-२-१४

[42] मा.श.ब्रा.भा १-१-२-१७

[43] का.श.ब्रा. २-१-२-१४

[44] मा.श.ब्रा.भा १-१-२-१९

[45] का.श.ब्रा. २-१-२-१५

[46] का.सं. १-३-७

[47] मा.श.ब्रा.भा १-१-२-२१

[48] का.श.ब्रा. २-१-२-१५

[49] का.श.ब्रा. २-१-२-१६

[50] का.श.ब्रा. २-१-२-१६

[51] का.सं. १-३-८

[52] का.श.ब्रा. २-१-२-१६